

॥बाल॥
॥१॥



॥श्रीगणेशायनमः॥अथबालबोधा
लिख्यते॥ विघ्नध्वांतंनमस्कृत्यदेविंनै
कसरस्वतिं॥गुरुंचदेवतानांचप्रसा
दादुद्धृतोमया॥१॥नानाशास्त्रस



॥राम॥
॥१॥




॥१

॥श्रीगणेशायनमः॥ शुक्लांबरधरंविष्णुंशशिवर्णंचतुर्भुजं॥ प्रसन्नव
दनंध्यायेत्सर्वविघ्नोपशांतये॥१॥ वस्त्रलो







का दिह प्राप्त नार
दंभ गव मि य
हे त्वा न त्वा
समा यांते पप्र कं
मुनयो मुदा॥२॥ नैमिषे षट्ते
ऋषयः शौनकादयः॥ देवर्षिमुपसंगम्य पप्रच्छुरिदमादृताः॥३॥

१

मि

ना

॥ ऋषय ऊचुः ॥ ब्रह्मकेनप्रकारेण सर्वपापक्षयो भवेत् ॥ विना दानेन तप
सा विना तीर्थैर्विना मखैः ॥ ४ ॥ विना वेदैर्विना ध्यानैर्विना चेंद्रियनिग्रहैः ॥ ॥ विना
शास्त्रसमूहैश्च कथं मुक्तिरवाप्यते ॥ ५ ॥ देवाधिदेवदेवेशः स्थितस्तपसि शंकरः
कश्च माराधये देवं जपध्यानपरायणः ॥ ६ ॥ नारद उवाच ॥ इदमेव पुरा पृष्टः पार्व
त्या परमेश्वरः ॥ यदुवाच शृणुध्वं हि कथयामि सुविस्तरात् ॥ ७ ॥ कैलासशिख
रासीनं देवदेवं जगद्गुरुं ॥ प्रणिपत्य महादेवं पर्यपृच्छदुमा प्रिया ॥ ८ ॥ पार्वत्युवा
च ॥ भगवंस्त्वं परो देवः सर्वज्ञः सर्वपूजितः ॥ त्वं लिंगमर्च्यते देवैर्ब्रह्मस्त्र्या
दिकैरपि ॥ ९ ॥ त्वत्तो लभंते भिमतां सिद्धिं सर्ववरप्रद ॥ त्वं जन्ममरणासुरहिताः स्वयं

भूः सर्वशक्तिमान् ॥ १० ॥ सदा ध्यायसि किं स्वामिन्दिग्वासास्त्वं नोत्तकः
तपस्त्वं रसि कस्मात्वं जटिलो भस्मधूसरः ॥ ११ ॥ किंवा जपसि देवेश परं कौतू-
हलं हि मे ॥ त्वमनुग्राह्या प्रियातेस्मि तत्त्वं कथय सुव्रत ॥ १२ ॥ श्रीमहादेव उ-
वाच ॥ न देवस्यापि कथितं गोपनीयमिदं मम ॥ किं तु वक्ष्यामि ते भद्रे त्वं भक्ता-
॥ २ ॥ सि प्रियासि मे ॥ १३ ॥ पुरा सत्ययुगे देवि विष्णुभक्तमतयोखिलाः ॥ यजंति विष्णु- ॥ २ ॥
मेवैकं ज्ञात्वा सर्वेश्वरेश्वरं ॥ १४ ॥ प्रयांति परमामृद्धिमैहिकामुष्मिकीं परां
॥ यां न प्राप्यासुरैः सर्वै रक्षयाक्लेशवर्जिताः ॥ १५ ॥ न तां गतिं प्रपद्यंते विना
भागवतान्नरान् ॥ मन्मुखादपि संस्तुत्य देवा विष्णुवहिर्मुखाः ॥ १६ ॥ वेदैः पु

रागैः सिद्धान्तैर्भिन्नैर्विभ्रांतचेतसः ॥ निश्चयं नाधिगच्छंति किं तत्त्वं किं परं पदं ॥ १७ ॥
तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः ॥ वाराणसीप्रयागादितीर्थस्नानादि
भिः प्रिये ॥ १८ ॥ गयाश्राद्धादिभिः पित्रैर्वेदपाठादिभिर्जपैः ॥ तपोभिरुग्रैर्नि
यंश्रे यमैर्भूतदयादिभिः ॥ १९ ॥ गुरुशुश्रूषणैः सत्यैर्वर्णाश्रमोदितैः ॥ ज्ञा
नध्यानादिभिः स[illegible]म्यक्कोटिजन्मजन्मभिः ॥ २० ॥ न यांति तत्परं श्रे
यो विभुं सर्वेश्वरेश्वरं ॥ सर्वभावेरनाश्रित्य पुराणपुरुषोत्तमं ॥ २१ ॥ ज्वलन्त्य
गतयो मत्त्वा भोगिनोपि परंतपा ॥ ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जि
ताः ॥ २२ ॥ सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः सुखेन यां गतिं

यांति नतां सर्वेपि धार्मिकाः ॥ २३ ॥ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जा
तु चित् ॥ सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥ २४ ॥ किं तु ब्रह्मादि
भिर्देवैः पुरा दृष्ट्वा निरीहे स ॥ निर्भयं विष्णुना प्रोक्तं च यथेष्टं पदमागताः ॥ २५ ॥
अलंकृत्वा चात्मानं पूजां सम्यगाराधितो हरिः ॥ मया चास्मादपि श्रेष्ठं वा
॥ ३ ॥ कृतात्मना ॥ २६ ॥ ततः साक्षाज्जगन्नाथः प्रसन्नो भक्तवत्सलः ॥ ॥ २ ॥
वंशांशेनात्मनेवेतान्पूजयामास केशवः ॥ २७ ॥ देवान्पितृन्द्विजन्न
हव्यकव्यादिभिः करुणामयः ॥ ततः प्रभृति पूज्यंते त्रैलोक्ये सचराचरे ॥ २ ॥
मां चोवाच यथा मत्तः पूज्यः श्रेष्ठो भविष्यसि ॥ त्वां मारा [illegible]था शंभो महीं

स्वामिवरं तव ॥ २९ ॥ द्वापरादौ युगे भूत्वा कलया मानुषादिषु ॥ स्व
गेहे: कल्पितैस्त्वं च जनान्माहं हि मुखानन्कुरु ॥ ३० ॥ मां च गोपययेन स्या
त्कृषिरे स्वोत्तरोत्तरा ॥ ततस्ते प्राप्ति पत्याहमेवो च परमेश्वरा ॥ ३१ ॥ श्री भ
गवानुवाच ॥ ब्रह्महत्यासहस्रस्य पापं शाम्यति कथं च न ॥ न पुनस्त्वं देवज्ञा
ने कल्पकोटिशतैरपि ॥ ३२ ॥ यस्मान्मया कृता सप्तं पवित्रः स्यां कथं हर
(स्पृ)शंति सर्वपापानि तन्मे वद सुरेश्वर ॥ ३३ ॥ श्री भगवानुवाच ॥ मदाना
मसहस्रं मे पावनं मत्यदावह ॥ तत्पठन्नुदिनं शंभो सर्वं स्पृश्यो यदाहसि ॥ ३४ ॥
श्रीमहादेव उवाच ॥ तमेवतपसा नित्यं भजामि स्तौमि चं तयो ॥ ते नाहिती

यमहिमानगत्पूज्योस्मि पार्वति ॥२५॥ पार्वत्युवाच ॥ तन्मे कथय देवेश
यथाहं मयि शंकर ॥ सर्वैश्वरी निरूपमा तवस्या सहस्मीप्रभो ॥२६॥ श्रीम
हादेव उवाच ॥ साधु साधु वयाप्रष्टं विष्णोर्भगवतः प्रिये ॥ नाम्नां स
हस्रं वक्ष्यामि मुख्यं त्रैलोक्यमुक्तिदं ॥२७॥ मंत्रः ॥ ॐ नमो नारायणाय
॥४॥ पुरुषाय महात्मने ॥ विशुद्धसत्वधिष्ण्याय महाहंसाय धीमही ॥२८॥ ॥वि॥
ॐ अस्य श्रीविष्णोर्नामसहस्रस्य श्रीमहादेवऋषी नारायण ऋषिरनुष्टु
प्छंदः ॥ विष्णुरूपी परमात्मा देवता अहं बीजं सोहं इति शक्तिः ॥ ॐ ह्रीं कीलकं
[illegible] परंवत्न इत्यंगुष्ठाभ्यां नमः ॥ रत्नप्रकृतिर्निर्गुणो नीभ्यां नमः

ॐ वासुदेव

महावराह इति मध्यमाभ्यां नमः ॥ सूर्यवंशध्वज इत्यनामिकाभ्यां नमः ॥
ब्रह्मादिकाम्यलालित्यजगदाश्चर्यशेशव इति कनिष्ठिकाभ्यां नमः ॥ पार्था
र्थखंडिताशेष इति करतलकरपृष्ठाभ्यां नमः ॥ ॐ वासुदेवः परं ब्रह्म इति
हृदयाय नमः ॥ मूलप्रकृतिरिति शिरसे स्वाहा ॥ महावराह इति शिखायै वष
ट् ॥ सूर्यवंशध्वज इति कवचाय हुं ॥ ब्रह्मादिकाम्यलालित्य इति नेत्रत्रयाय
वौषट् ॥ पार्थार्थखंडिताशेष इत्यस्त्राय फट् ॥ दिव्यास्त्र इति स्त्रं सर्वपापाक्षु
द्रयार्थं मे दार्थं श्रीविष्णोर्नामसहस्रजपे विनियोगः ॥ अथ ध्यानं ॥ ॐ
विष्णुर्भास्वत्किरीटांगदवलयगलाकल्पहारोदरांघ्रिश्रोसीभूषसुवक्षो

मणिमकरमहाकुण्डलाम[illegible]ण्डितांसं ॥ हस्तोद्यच्चक्रसंखांबुजगद
ममलपीतकौशेयवाससविद्योतज्ञामसमुद्यदिनकरसदृशपद्मसंस्थन
मामि ॥३९॥ वासुदेवः परब्रह्म परमात्मा परात्परः । परंधाम परंज्योतिः
परंतत्वं परंपदं ॥४०॥ परः शिवः परोध्येयः परंज्ञानं परा गतिः । परमार्थः ॥५॥
॥५॥ परंश्रेयः परानंदः परोदयः ॥४१॥ परोव्यक्तात्परंव्योम परर्द्धिः परमेश्वरः ।
निरामयो निर्विकारो निर्विकल्पो निराश्रयः ॥४२॥ निरंजनो निरालंबो नि
र्लेपो निरविग्रहः । निर्गुणो निष्कलोनंतोभयोचिंत्यो चलच्युतः ॥४३॥
अतींद्रियो मितापारो नीशो नीहो व्ययो क्षय ॥ सर्वज्ञः सर्वगः सर्वः सर्वदः सर्वे

भावनः ॥८४॥ सर्वशास्ता सर्वसाक्षी पूज्यः सर्वस्य सर्वदृक् ॥ सर्वशक्तिः सर्वसा
रः सर्वात्मा सर्वतोमुखः ॥८५॥ सर्ववासः सर्वरूपः सर्वादिः सर्वदुःखहा ॥ सर्वा
र्थः सर्वतोभद्रः सर्वकारणकारणं ॥८६॥ सर्वातिशायकः सर्वाध्यक्षः सर्वे
श्वरेश्वरः ॥ षड्विंशको महाविष्णुर्महागुह्यो महाहविः ॥८७॥ नित्योदितो
नित्ययुक्तो नित्यानंदः सनातनः ॥ मायापतिर्योगपतिः कैवल्यपतिरात्म
भूः ॥८८॥ जन्ममृत्युजरातीतः कालातीतो भवातिगः ॥ पूर्णः सत्यः शुद्ध
बुद्धस्वरूपो नित्यचिन्मयः ॥८९॥ योगिप्रियो योगमयो भवबंधैकमोच
कः ॥ पुराणपुरुषः प्रत्यक्चैतन्यः पुरुषोत्तमः ॥९०॥ वेदांतवेद्यो दुर्ज्ञेयस्ता

।। ६ ।।

पञ्चपविवर्जितः ।। ब्रह्मविद्याश्रयोनघः स्वप्रकाशः स्वयंप्रभुः ।। ५१ ।। सर्वो
पेय उदासीनः प्रणवः सर्वतः समः ।। सर्वोनविद्यो दुःप्रापस्तुरीयस्तम
सः परः ।। ५२ ।। अनुत्तरस्थः सर्वसंन्निविष्टो वाङ्मनोगोचरातिगः ।। संकर्षणः
सर्वहरः कालः सर्वभयंकरः ।। ५३ ।। अनुत्तम्यः सर्वगतिर्महारुद्रो दुरास
दः ।। मूलप्रकृतिरानंदः प्रद्युम्नो विश्वमोहनः ।। ५४ ।। महामायो विश्ववी ।। ६ ।।
जं परशक्तिः सुखैकभूः ।। सर्वकाम्योनंतलीलः सर्वभूतवशंकरः ।। ५५ ।।
अनिरुद्धः सर्वजीवो हृषीकेशो मनस्पतिः ।। निरुपाधिप्रियो हंसोक्षरः
सर्वनियोजकः ।। ५६ ।। ब्रह्मा प्राणेश्वरः सर्वभूतभृद्देहनायकः ।। क्षेत्रज्ञः

प्रकृतिस्स्वामी पूरुषो विश्वसृट्त्वष्टकृत् ॥५७॥ अंतर्यामी त्रिधामांतः साक्षी नि
र्गुण ईश्वरः ॥ योगिगम्यः पद्मनाभः शेषशायी श्रियः पतिः ॥५८॥ श्रीस
दोपास्यपादाब्जो नित्यश्रीः श्रीनिकेतनः ॥ नित्यवक्षःस्थलस्थश्रीः श्रीनि
धिः श्रीधरो हरिः ॥५९॥ वश्यश्रीर्निश्चलश्रीदो विष्णुः क्षीराब्धिमंदिरः ॥
कौस्तुभोऽब्जसितो रक्षो माधवो जगदार्तिहा ॥६०॥ श्रीवत्सवक्षा निःसीमकल्या
णगुणभाजनः ॥ पीतांबरो जगन्नाथो जगत्त्राता जगत्पिता ॥६१॥ जगद्बंधुर्जग
त्स्रष्टा जगद्धाता जगन्निधिः ॥ जगदेकस्फुरद्वीर्यो नाहंवादी जगन्मयः ॥६२॥
सर्वश्चर्यमयः सर्वसिद्धार्थः सर्वपारजित ॥ सर्वामोघोद्यमो ब्रह्मरुद्राद्युत्कृ

चेतन॥ ६३॥ शंभोः पितामहो ब्रह्मा पिता शक्राद्यधीश्वरः॥ सर्व्वदेवप्रियः
सर्व्वदेवमूर्त्तिरनुत्तमः॥ ६४॥ सर्व्वदेवैकशरणं सर्व्वदेवैकदेवतम्॥ यज्ञभु
ग्यज्ञफलदो यज्ञेशो यज्ञभावनः॥ ६५॥ यज्ञत्राता यज्ञपुमान् वनमाली द्वि
जप्रियः॥ द्विजैकमानदो विप्रकुलदेवो सुरांतकः॥ ६६॥ सर्व्वदुष्टांतकृत्सर्व्व
॥७॥ सज्जनानन्यपालकः॥ सप्तलोकैकजठरः सप्तलोकैकमंडनः॥ ६७॥ सृ ॥७॥
ष्टिस्थित्यंतकृच्चक्री शार्ङ्गधन्वा गदाधरः॥ शंखभृन्नंदकी पद्मपाणि
र्गरुडवाहनः॥ ६८॥ अनिर्देश्यवपुः सर्व्वः सर्व्वत्रैलोक्यपावनः॥ अनंत
कीर्त्तिर्न्निःसीमपौरुषः सर्व्वमंगलः॥ ६९॥ सूर्यकोटिप्रतीकाशो यमकोटि

दुरासदः ॥ ब्रह्मकोटिजगत्स्रष्टा वायुकोटिमहाबलः ॥ १० ॥ कोटींदुजगदानं
दी शंभुकोटिमहेश्वरः ॥ कुबेरकोटिलक्ष्मीवान् शक्रकोटिविलासवान् ॥ ११ ॥
कंदर्पकोटिलावण्यो दुर्गाकोटिरिमर्द्दनः ॥ समुद्रकोटिगंभीरस्तीर्थकोटिस
माह्वयः ॥ १२ ॥ हिमवत्कोटिनिःकंपः कोटिब्रह्मांडविग्रहः ॥ कोट्यश्वमेधपापघ्
घ्नो यज्ञकोटिसमार्चनः ॥ १३ ॥ सुधाकोटिः स्वास्थ्यहेतुः कामधुक्कोटिकामदः ॥
ब्रह्मविद्याकोरूपः शिपिविष्टः शुचिश्रवाः ॥ १४ ॥ विश्वंभरस्तीर्थपादः पुण्य
श्रवणकीर्तनः ॥ आदिदेवो जगज्जैत्रो मुकुंदः कालनेमिहा ॥ १५ ॥ वैकुंठोनंत
महात्म्यो महायोगेश्वरोत्सवः ॥ नित्यतृप्तो लसद्भावो निःशंको नरकांतकः ॥ १६ ॥

दीनानाथैकशरणं विश्वैकव्यसनापहः जगत्कृपानन्दमो नित्यं कृपालुः स
ज्जनाश्रयः ॥७१॥ योगेश्वरः सदोदीर्णो वृद्धिह्रासविवर्जितः ॥ स्वघोद्गो
विश्वरेता प्रजापतिः शताधिपः ॥७४॥ शंकरः ब्रह्मार्चितपदः शंभुर्ब्रह्मोर्द्धधाम
गः ॥ सूर्यसोमेन्द्रगो विश्वभोक्ता सर्वस्यपारगः ॥७५॥ जगत्सेतुर्धर्मसेतुर्ध्रुवो
॥८॥ विश्वधुरंधरः ॥ निर्ममत्वित्तलोकेशोतेः संगोद्भुतभोगवान् ॥८१॥ विश्वकर्मा ॥८॥
योवश्वविश्वो विष्वक्सेनः सुरोत्तमः ॥ सर्वश्रेयः पतिर्दिव्यानर्घ्यभूषणभू
षितः ॥८२॥ सर्वलक्षणलक्षण्यः सर्वदैत्येंद्रदर्पहा ॥ समस्तदेवसर्वस्वं सर्व
देवमनायकः ॥८३॥ समस्तदेवकवचं सर्वदेवशिरोमणिः ॥ समस्तदेवतादु

ज्यः प्रपन्नाशनिपंजरः ॥ ८३ ॥ समस्तभयभिन्नामा भगवान्विष्टरश्रवाः ॥ विभुः
सर्व्वहितोदर्क्को हतारिः स्वर्गतिप्रदः ॥ ८४ ॥ सर्व्वदैवतजीवेशो ब्राह्मणादिनियोज
कः ॥ ब्रह्मशंभुपरार्द्धायुर्ब्रह्मन्त्येष्टः शम्भुः स्वराट् ॥ ८५ ॥ विराड्रूपराधीनः
स्तत्यः स्तोत्रार्थसाधकः ॥ परार्थकर्त्ता कृत्यज्ञः स्वार्थकृत्यसदोज्झितः ॥ ८६ ॥
सदानंदः सदाभद्रः सदा शांतः सदाशिवः ॥ सदाप्रियः सदातुष्टः सदापुष्टः सदा
र्चितः ॥ ८७ ॥ सदापूतः पावनाग्र्यो वेदगुह्यो वृषाकपिः ॥ सहस्रनामा त्रियुगश्च
तुर्मूर्त्तिश्चतुर्भुजः ॥ ८८ ॥ भूतभव्यभवन्नाथो महापुरुषपूर्वजः ॥ नारायणो मुंज
केशः सर्व्वयोगविनिःसृतः ॥ ८९ ॥ वेदसारो यज्ञसारः सामसारस्तपोनिधिः ॥

साध्यः श्रेष्ठः पुराणर्षिर्निष्ठा शांतिः परायणं ॥ ९० ॥ शिवत्रिशूलविध्वंसी श्रीकंठैकवरप्रदः ॥ नरः कृष्णो हरिर्धर्मनंदनो धर्मजीवनः ॥ ९१ ॥ आदिकर्त्ता सर्वसत्यः सर्वस्त्रीरत्नदर्पहा ॥ त्रिकालजितकंदर्प उर्वशीसृड्मुनीश्वरः ॥ ९२ ॥ आद्यः कविर्हयग्रीव सर्ववागीश्वरेश्वरः ॥ सर्वदेवमयो ब्रह्मगुरुर्वागीश्वरीपतिः ॥ ९३ ॥ अनंतविद्याप्रभवो मूलाविद्याविनाशकः ॥ सार्वज्ञदो जगज्जाड्यनाशको मधुसूदनः ॥ ९४ ॥ अनेकमंत्रकोटीशः शब्दब्रह्मैकपारगः ॥ आदिविद्वान् वेदकर्त्ता वेदात्मा श्रुतिसागरः ॥ ९५ ॥ ब्रह्मार्थवेदाहरणः सर्वविज्ञानजन्मभूः ॥ विद्याराजो ज्ञानमूर्त्तिर्ज्ञानसिंधुरखंडधीः ॥ ९६ ॥ मत्स्यदेवो महाशृंगो जगद्बी

जैवहितैच्छकः ॥ लीलाव्याप्ताखिलांभोधिश्चतुर्वेदप्रवर्तकः ॥ ९७ ॥ आदिकूर्मो
खिलाधारस्तृणीकृतजगद्भरः ॥ अमरीकृतदेवौघः पीयूषोत्पत्तिकारणं ॥ ९८ ॥
आत्माधारो धराधारो यज्ञांगो धरणीधरः ॥ हिरण्याक्षहरः पृथ्वीपतिः श्राद्धा
दिकल्पकः ॥ ९९ ॥ समस्तपितृभीतिघ्नः समस्तपितृजीवनं ॥ हव्यकव्यैकभु
ग्हव्यकव्यैकफलदायकः ॥ १०० ॥ रोमांतर्लीनजलधिः क्षोभिताशेषसागरः
महावराहो यज्ञघ्नो ध्वंसनो याज्ञिकाश्रयः ॥ १ ॥ श्रीनृसिंहो दिव्यसिंहः सर्वारिष्टा
र्तिदुःखहा ॥ एकवीरोद्भुतबलो यंत्रमंत्रैकभंजनः ॥ २ ॥ ब्रह्मादिदुःसहज्योति
र्युगांताग्न्यतिभीषणः ॥ कोटिवज्राधिकनखो जगद्दुःप्रेक्ष्यमूर्तिधृक् ॥ ३ ॥

मात्रचक्रप्रमर्थनो महामातृगणेश्वरः ॥ अचिंत्यामोघवीर्याढ्यः समस्ता
सुरघस्मरः ॥४॥ हिरण्यकशिपुच्छेदी कालः संकर्षणीपतिः ॥ कृतांतवाहनः सद्य
समस्तभयनाशकः ॥५॥ सर्वविघ्नात्मकः सर्वसिद्धिदः सर्वपूरकः ॥ समस्तपात
कध्वंसी सिद्धमंत्राधिकारकः ॥६॥ भैरवेशो हरार्त्तिघ्नः कालकोटिदुःशमदः ॥ ॥१०॥
॥१०॥ दैत्यगर्भस्रावि नामास्फुटब्रह्मांडगर्जितः ॥७॥ समस्तमातृखिलजाताद्भुता
रु पोमहारिः ॥ ब्रह्मचर्मशिरःपट्टोदिक्पालांगभूषणः ॥८॥ द्वादशार्कशिरो
दामा तुंडशीर्षकनूपुरः ॥ योगिनीग्रस्तगिरिजात्राता भैरवतर्जकः ॥९॥ वीरच
क्रेश्वरोत्युग्रो यमारिः कालशंवरः ॥ क्रोधेश्वरो रुद्रचंडीपरिवारादिदुष्टभुक् ॥१॥

सर्वाद्यो भीमृत्युमृत्युः कालमृत्युनिवर्तकः ॥ असाध्यसर्वरोगघ्नः सर्वदुग्रहसौ
म्यकृत ॥ ११ ॥ गणेशः कोटिदर्पघ्नो दुःसहाशेषगोत्रहा ॥ देवदानवदुर्द्दर्शो जगद्भ
यदभीषणः ॥ १२ ॥ समस्तदुर्गतित्राता जगद्भक्षकभक्षकः ॥ उग्रेशो वरमार्जारः
कालमूषकभक्षकः ॥ १३ ॥ अनेतायुधदोर्द्दण्डो नरसिंहो वीरभद्रजित् ॥ योगि
नीचक्रगुह्येशः शक्रारिपशुमांसभुक् ॥ १४ ॥ रुद्रो नारायणो मेषरूपशंक
रवाहनः ॥ मेषरूपशिवत्राता दुष्टशक्तिसहस्रभुक् ॥ १५ ॥ तुलसीवल्लभो वी
रो वामाचारो खिलेष्टदः ॥ महाशिवः शिवारूढो भैरवैककपालधृक् ॥ १६ ॥
झिल्लीचक्रेश्वरः शक्रो दिव्यमोहननूपदः ॥ गौरीसौभाग्यदो मायानिधिर्मा

यामयापहः॥१७॥ब्रह्मतेजोमयो ब्रह्मश्रीमयस्त्रयीमयः।सुब्रह्मण्यो ब
लिध्वंसी वामनोऽदितिदुःखहा॥१८॥उपेंद्रो नृपतिर्विष्णुः कश्यपान्वयमंड
नः बलिस्वराज्यदः सर्वदेवविप्रान्नदोऽच्युतः॥१९॥उरुक्रमस्तीर्थपादस्त्रि
पदस्थस्त्रिविक्रमः॥व्योमपादः स्वपादांभःपवित्रितजगत्त्रयः॥२०॥ब्रह्मेशा
॥११॥ द्यभिवंद्यांघ्रिर्द्रुतधर्मांघ्रिधावनः।अचिंत्याद्भुतविस्तारो विश्ववृक्षो महा ॥११॥
बलः॥२१॥राहुमूर्द्धापरांगच्छिद्भृगुपत्नीशिरोहरः।पापात्रस्तः सदापुण्यो
दैत्याशानित्यखंडनः॥२२॥पूरिताखिलदेवेशो विश्वार्थैकावतारकृत्॥स्वमा
यानित्यगुप्तात्मा भक्तचिंतामणिः सदा॥२३॥वरदः कार्तवीर्यादिराजराज्यप

त्य

प्रदेनघ्नः ॥ विश्वस्रष्टा घ्योमिताचारो दत्तात्रेयो मुनीश्वरः ॥ २४ ॥ परशक्तिस
दाश्लिष्टो योगानंदः सदोन्मदः ॥ समस्तेंद्रारितेजोहृत्परमामृतपद्मपः ॥ २५ ॥
अनुसूयागर्भरत्नं भोगमोक्षसुखप्रदः ॥ यमदग्निकुलादित्यो रेणुकाद्भुत
शक्तिकृत् ॥ २६ ॥ मातृहत्यादिनिर्लेपः स्कंदाप्तद्विप्रराज्यप्रदः ॥ सर्वक्षत्रांतकृत
कृद्वीरदर्पहा कार्तवीर्यजित् ॥ २७ ॥ सप्तद्वीपावतीदाता शिवाचार्ययशप्रदः ॥
भीमः परशुरामश्च शिवाचार्यैकविश्वभूः ॥ २८ ॥ शिवाखिलज्ञानकोशो (
भीष्माचार्याग्निदैवतः ॥ द्रोणाचार्यगुरुर्विश्वजैत्रधन्वा कृतांतजित् ॥ २९ ॥
अद्वितीयतपोमूर्तिर्ब्रह्मचर्यैकदक्षिणः ॥ मनुः श्रेष्ठः सतां सेतुर्महीयान्

ऋषभो विराट्॥२०॥ स्वादिराट् क्षितिपिता सर्वरत्नैकदोहकृत्॥ पृथुर्जन्मा
द्येकदक्षो गीःश्रीकीर्तिस्वयंवृतः॥२१॥ जगद्वृत्तिप्रदश्चक्रवर्तिश्रेष्ठो द्वया
स्त्रधृक् सनकादिमुनिप्राप्यभगवद्भक्तिवर्द्धनः॥२२॥ वर्णाश्रमादिधर्मा
णां कर्त्ता वक्ता प्रवर्त्तकः सूर्यवंशध्वजो रामो राघवः सद्गुणार्णवः॥२३॥
॥१२॥ काकुत्स्थो वीरराड्राजा राजधर्मधुरंधरः॥ नित्यः स्वस्थाश्रयः सर्वभद्रग्राही १२॥
शुभैकदृक्॥२४॥ नररत्नं रत्नगर्भो धर्माध्यक्षो महानिधिः॥ सर्वश्रेष्ठा
श्रयः सर्वशास्त्रार्थग्रामवीर्यवान्॥२५॥ जगद्वशी दाशरथिः सर्वरत्नाश्र
यो नृपः॥ समस्तधर्मसूः सर्वधर्मद्रष्टाखिलार्तिहृत्॥२६॥ अतीन्द्रो ज्ञा

तविज्ञानपारदृश्वा क्षमांबुधिः ॥ सर्वप्रकृष्टः शिष्टेष्टो हर्षशोकाद्यनाकुलः
॥३७॥ पित्राज्ञात्यक्तसाम्राज्यः सपत्न्योदयनिर्भयः ॥ गुहादेशार्पितैश्वर्यः
शिवस्पृष्टजटाधरः ॥३८॥ चित्रकूटाप्तरत्नाद्रिर्जगदीशो वनेचरः ॥ यथेष्टा
मोघसर्वास्त्रो देवेन्द्रतनयाक्षिहा ॥३९॥ ब्रह्मेन्द्रादिनतैषीको मारीचघ्नो विरा
धहा ॥ ब्रह्मशापहताशेषदंडकारण्यपावनः ॥४०॥ चतुर्दशसहस्रोग्ररक्षो
घ्नैकशरैकभृत् ॥ खरारिस्त्रिशिरोहंता दूषणघ्नो जनार्दनः ॥४१॥ जटायु
षोऽग्निगतिदोऽगस्त्यः सर्वस्वमंत्रराट् ॥ लीलाधनुःकोट्यपास्तदुंदुभ्यस्थि
महाचयः ॥४२॥ सप्ततालव्यधाकृष्टध्वस्तपातालदानवः ॥ सुग्रीवराज्यद

दोहीनमनसेवाभयप्रदः ॥४३॥ हनुमच्छुद्धमुख्येशः समस्तकपिदेहभृत ॥
सनागदैत्यबाणैकव्याकुलीकृतसैगरः ॥४४॥ समस्तैककोटिबाणैकसुच्छिन्नाति
हिगन्धसागरः ॥ समुद्राद्भुतपूर्वैकबद्धसेतुर्यशोनिधिः ॥४५॥ असाध्यसाधको
ल्लंकासमूलोत्कर्षदक्षिणः ॥ वरदृप्तजगद्धत्प्यौलस्त्यकुलकृंतनः ॥४६॥
॥१३॥ रावणिघ्नः प्रहस्तच्छित्कुंभकर्णभिदुग्रहा ॥ रावणैकशिरश्छेत्ता निःशंकेंद्रैक ॥१२॥
राज्यदः ॥४७॥ स्वर्गास्वर्गत्वविच्छेदी देवेंद्रानिंद्रताहरः ॥ रक्षोदेवत्वहृद्धर्माधर्म
त्वघ्नः पुरुष्टुतः ॥ नतिमात्रदशास्यारिदत्तराज्यविभीषणः ॥ सुधावृष्टिमृताशेष
स्वसैन्योज्जीवनैककृत ॥४८॥ देवब्राह्मणनामैकधातासर्वामरार्चितः ॥ ब्रह्मस्

यैं इरुद्रादिदेवैर्ध्यापितमतिप्रियः ।।५०।। ध्येयो ध्याखिलराजाग्र्यः सर्वभूतमनो
हरः । स्वाम्यतुल्यकृपादंडो हीनोत्कृष्टैकसत्प्रियः ।।५१।। स्वपक्षपादिन्यायदर्शी
हीनार्थाधिकसाधकः । वधव्याधानुचितकृत्तारकोऽखिलतुल्यकृत् ।।५२।। पार्श्वे
त्याधिकमुक्तात्माप्रियात्यकृत्स्मरारिजित् । साक्षात्कुशलवक्षेत्रेन्द्राग्नितातो
२ परजितः ।।५३।। कोशले ज्ञोवीरबाहुः सत्यार्थत्यक्तसोदरः । शरसंधाननिर्धूत
धरणीमंडलोदयः ।।५४।। ब्रह्मादिकाम्यसान्निध्यसनाथीकृतदैवतः । ब्रह्म
लोकाप्तचांडालाद्यशेषप्राणिसार्थपः ।।५५।। स्वर्णीतगर्दभाश्वादिचिरायो
ध्यावानेककृत् । रामद्वितीयः सौमित्रिर्लक्ष्मणः प्रहतेन्द्रजित् ।।५६।। विष्णु

भक्तांशारामोद्विप्राडुकाराज्यनिर्वृतः ॥ भरतोमत्स्यगंधर्वकोटिघ्नोलवणां
तकः ॥५७॥ शत्रुघ्नोवैद्यराडायुर्वेदगर्भौषधीपतिः ॥ नित्यामृतकरोधन्वंत
रिर्यज्ञोजगद्धरः ॥५८॥ सूर्यारिघ्नः सुराजीवोदक्षिणेशोद्विजप्रियः ॥ छिन्न
मूर्द्धोपादेशार्कः शेषांशः स्थापितामरः ॥५९॥ विश्वार्थाशेषधृद्राष्ट्रशि
।१८। रश्छेदाकृताकृतिः ॥ वाजपेयादिनामाग्निर्वेदधर्मपरायणः ॥६०॥ श्वेतद्वी ॥१८॥
पपतिः सांख्यप्रणेतासर्वसिद्धराट् ॥ विश्वप्रकाशितज्ञानयोगोमोहतमिस्र
हा ॥६१॥ देवहूत्यात्मजः सिद्धः कपिलः कर्द्दमात्मजः ॥ योगस्वामीध्यानभं
गसगरात्मजभस्मकृत ॥६२॥ धर्मोवृषेंद्रः सुरभीपतिः शुद्धात्मभावितः ॥

शंभुस्त्रिपुरदाहैकस्थैर्यो विश्वरथोद्वहः ॥६३॥ भक्तेशंभुजितो दैत्यःमृतवापी
समस्तपः ॥ महाप्रलयविश्रैको द्वितीयो खिलनागराट् ॥६४॥ शेषदेवः सह
स्रकः सहस्रास्यो द्विशिरोभुजः ॥ फणामणिकणाकारं योजिताब्ध्युदक्षितिः
॥६५॥ कालाग्निरुद्रजनको मुसलास्त्रो हलायुधः ॥ नीलांबरो वारुणीशो
मनोवाक्कायदोषहा ॥६६॥ वस्रसंतोषो दृष्टिमात्रपातितैकदशाननः ॥
वलिसंयमनो घोरो रौहिणेयः प्रलंबहा ॥६७॥ मुष्टिकघ्नो द्विविदहा का
लिंदीभेदनो वलः ॥ रेवतीरमणः पूर्वभक्तिखेदाच्युताग्रजः ॥६८॥ देवकी
वसुदेवाह्वकश्यपादितिनंदनः ॥ वार्ष्णेयः सात्वतां श्रेष्ठः शौरिर्यदुकुलोद्वहः ॥६९॥

नाराकृतिपरंब्रह्मसव्यसाचिवरप्रदः॥ब्रह्मादिकाम्यलालित्यजगदाश्चर्यशैशे
शवः॥७०॥पूतनाघ्नः शकटभिद्यमलार्जुनभंजनः॥वातासुरारिकेशिघ्नो धे
नुकारिर्गवीश्वरः॥७१॥दामोदरोगोपदेवो यशोदानंदकारकः॥कालीयमर्द्द
नः सर्वगोपगोपीजनप्रियः॥७२॥लीलागोवर्द्धनधरो गोविंदो गोकुलोत्स
॥१५॥ वः॥अरिष्टमथनः कामोन्मत्तगोपीविमुक्तिदः॥७३॥सद्यः कुवलयापीड ॥१५॥
घाती चाणूरमर्द्दनः॥कंसारिरुग्रसेनादिराज्यव्यापारितामरः॥७४॥सुध
र्माक्रितभूर्लोको जरासंधबलांतकः॥त्यक्तभग्नजरासंधो भीमसेनयशःप्र
दः॥७५॥सांदीपनिमृतापत्यदाता कालांतकादिजित्॥समस्तनारकित्राता

ता सर्व्वभूपतिकोटिजित ॥७६॥ रुक्मिणीरमणो रुक्मिशासनो नरकांतकः
समस्तसुंदरीकांतो मुरारिर्गरुडध्वजः ॥७७॥ एकाकीजितरुद्रार्क्कमरुदाद्य
खिलेश्वरः ॥ देवेंद्रदर्प्पहा कल्पद्रुमालंकृतभूतलः ॥७८॥ बाणबाहुःसहस्रच्छि
न्नंद्यादिगणकोटिजित ॥ लीलाजितमहादेवो महादेवैकपूजितः ॥७९॥
इंद्रार्थार्जुननिर्भंगः जयदः पांडवैकधृक् ॥ काशिराजशिरश्छेत्ता रुद्रशक्ति
कमर्द्दनः ॥८०॥ विश्वेश्वरप्रसादाढ्यः काशिराजसुतार्द्दनः ॥ शंभुप्रति
ज्ञाविध्वंसी काशीनिर्द्दग्धनायकः ॥८१॥ काशीशगणकोटिघ्नो लोकशिक्षा
द्विजार्च्चकः ॥ युवतीव्रतपोवश्यः पुराशिववरप्रदः ॥८२॥ शंकरैकप्रतिष्ठा

ध्वकृमोश शंकरपूजकः ॥ शिवकन्याव्रतपतिः कृष्णरूपशिवारिहा ॥ ८२
महालक्ष्मीवपुर्गौरी ज्ञातावेदलन्तज्ञहा ॥ स्वधाममुचुकुंदैकतिंकालय
वनेष्टकृत ॥ ८३ ॥ यमुनापतिरानीतपरिलीनद्विजात्मजः श्रीदामरंक
भक्तार्थभूम्यानीतेंद्रवैभवः ॥ ८४ ॥ दुर्वृत्तशिशुपालैकमुक्तिदो द्वारके
॥१६॥ श्वरः ॥ आचांडालादिकप्राप्यद्वारकानिधिकोटिकृत ॥ ८५ ॥ अक्रूरो ॥१६॥
द्धवमुख्यैकभक्तस्वच्छंदमुक्तिदः ॥ सबालस्त्रीजलक्रीडामृतवापीकृतार्ण
वः ॥ ८६ ॥ ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैकदः ॥ परिलीनद्विजसुताने
तार्जुनमदापहः ॥ ८७ ॥ गूढमुद्राकृतिग्रस्तभीष्माद्याखिलकौरवः ॥

पार्थार्थखंडिताशेषदिव्यास्त्रः पार्थमोहनः ॥ ८९ ॥ गर्भशापक्षतध्वं
स्तयादवोर्वीभरापहः ॥ जराव्याधारिगतिदः स्मृतमात्राखिलेष्टदः ॥ ९० ॥
कामदेवो रतिपतिर्मन्मथः शंबरांतकः ॥ अनंगो जितगौरीशो रतिकांतः स
देप्सितः ॥ ९१ ॥ पुष्पेषुर्विश्वविजयी स्मरः कामेश्वरीप्रियः ॥ ऊषापतिर्वि
श्वकेतुर्विश्वदृप्तोधिपूरुषः ॥ ९२ ॥ अनिरुद्धो वृहद्द्युम्नप्रद्युम्नो विश्व
मोहनः ॥ चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥ ९३ ॥ चतुर्वेदैक
विश्वात्मा सर्वोत्कृष्टांशकोटिसूः ॥ आश्रमात्मा पुराणर्षिर्व्यासः शाखा
सहस्रकृत ॥ ९४ ॥ महाभारतनिर्माता कवीन्द्रो बादरायणः ॥ कृष्णद्वै

पायनः सर्वपुरुषार्थैकबोधकः ॥ ९५ ॥ वेदांतकर्ता ब्रह्मैकव्यंजकः ॥
पुरुवंशकृत् ॥ बुद्धो ध्यानजिताशेषदेवदेवीजगत्प्रियः ॥ ९६ ॥ निरायुधो
जगज्जैत्रः श्रीधरो दुष्टमोहनः दैत्यवेदबहिःकर्ता वेदार्थश्रुतिगोपकः
॥ ९७ ॥ शौद्धोदनिर्दृष्टदिष्टः सुखदः सदसत्पतिः ॥ यथायोग्याखिल
॥१९॥ कृपः सर्वशून्योखिलेष्टदः ॥ ९८ ॥ चतुःकोटिपृथक्तत्वं प्रज्ञापारमि ॥१९॥
तेश्वरः ॥ पाखंडवेदमार्गेशः पाखंडश्रुतिगोपकः ॥ ९९ ॥ कल्की वि
ष्णुयशःपुत्रः कलिकालविलोपकः ॥ समस्तम्लेच्छदुष्टघ्नः सर्वशिष्ट
द्विजातिकृत् ॥ १०० ॥ सत्यप्रवर्तको देवद्विजदीर्घक्षुधापहः ॥ अश्व

वारादिरेवंतः पृथ्वी दुर्गतिनाशनः ॥२०१॥ स्कंधः क्ष्मीनंतलक्ष्मीस्त इ
निःशेषधर्मकृत ॥ अनंतरूपणायागे कहेमपूर्णाशि कल्नेद्विजः ॥१॥ अस्मा
च्चैकतगत्कास्त्ता विश्ववंद्यो जगद्गुरुः ॥ आत्मातत्त्वाधिपः कर्तृश्रेष्ठो वि
धिरुमापतिः ॥३॥ भर्तृश्रेष्ठः प्रजेशानां मरीचिर्जुनकाग्रणीः । कश्यपो
देवराडिंद्रः प्रह्लादो दैत्यराट्शशी ॥४॥ नक्षत्रेशो रविस्तेजः श्रेष्ठः मु
नेः कवीश्वरः ॥ महर्षिराड्भृगुर्विष्णुरादित्येशो बलिः स्वराट् ॥५॥ वायु
र्वह्निः शुचिः श्रेष्ठः शंकरो रुद्रराट् ॥ विद्वत्तमस्त्विच्चरथो गंधर्वोऽश्वा
द्रोत्तमः ॥६॥ वर्णादिरु ग्रामान्गोरीशा क्वाग्म्याश्चीस्वनारदः ॥ देवर्षि

राटपांडवाग्र्योर्जुनोवादःप्रवादानाहं॥७॥पवनःपवतेमानोवरुणोयाद
सांपतिः॥गंगातीर्थोत्तमोद्युतंछलतांकाग्रवरौषधम्॥८॥स्कन्नमसुदर्शनोस्त्रा
ण्यवज्रंप्रहरणोत्तमो॥७॥उच्चैःश्रवावाजिराजऐरावतःइभेश्वरः॥८॥स्मरःप्र
त्यकपतीशोत्यश्ववत्थोशेषःहृदानाहं॥९॥अध्यात्मविद्याविद्यानांप्रणव
॥१८॥ छंदसांवरः॥१०॥मेरुर्गिरिपतिर्मार्गशीर्षमासाग्र्यःकालस्तत्तमः॥दिनाद्यात्मा ॥१८॥
पूर्वसिद्धःकपिलःसामवेदोनाहं॥११॥तार्क्ष्यःखगेंद्रोश्वत्थग्र्योवसंतःक
ल्पपादपः॥दातृश्रेष्ठःकामधेनुःरतिर्धेग्र्यःसुकृतमः॥१२॥चिंतामणि
गुरुश्रेष्ठोमातातितमःपिता॥सिंहोमृगेंद्रोनागेंद्रोवासुकिर्नृवरोनृपः॥१३॥

वरीयसो व्रात्मरणस्मृतः करात्तग्रं नमो नमः। इत्येतद्वासुदेवस्य विष्णोर्नाम
सहस्रकं ।१४। सर्वपापप्रशमनं परं भक्तिविवर्द्धनं । स्मृतं यत्त्वंत्यलोकादि सं
सर्वस्वैकसाधनं ।१५। विष्णुलोकैकसोपानं सर्वदुःखविनाशनं । समस्तसु
खदं सद्यः परं निर्वाणदायकं ।१६। कामक्रोधादिनिःशेषमनोमलवि
३५ शोधनं । शांतिदं पावनं नॄणां महापातकिनामपि ।१७। सर्वेषां प्राणिना
मासु सर्वाभीष्टफलप्रदं । सर्वविघ्नप्रशमनं सर्वारिष्टविनाशनं ।१८।
घोरदुःखप्रशमनं सर्वारिष्टविनाशनं । घोरदुःखप्रशमनं तीव्र दारि
द्र्यनाशनं ।१९। ऋणत्रयापहं गुह्यं धनधान्ययशस्करं । मं। मोक्ष

र्यप्रदं सर्वसिद्धिदं सर्वधर्मदं ॥२०॥ तीर्थयज्ञतपोदानव्रतकोटिफल
प्रदम् ॥ जगज्जाड्यप्रशमनं सर्वविद्याप्रवर्तकं ॥२१॥ राज्यदं भ्रष्टराज्या
गौ.३ नां रोगिणां सर्वरोगहृत ॥ वंध्यानां सुतदं चाप्मृदीर्गणां जीवितप्रदं ॥२२॥
भूतग्रहविषध्वंसी ग्रहपीडाविनाशनं ॥ मांगल्यं पुण्यमायुष्यं श्रवणा
॥१९॥ त्पठनाज्जपात् ॥२३॥ महद्रस्याखिलावेदागमेनाम्नाकोटिशः ॥ पुरा ॥१९॥
णशास्त्रस्मृतयः श्रुतास्तुः पठितास्तथा ॥२४॥ जन्मार्स्येकाह्नरं स्तो
कपादं वा पठतः प्रियं ॥ नित्यं अस्य ज्ञातिसर्वं क्षमचिरात्रिस्मृतारिखते ॥२५॥
नानेन सहस्रनामस्य प्रत्ययं सर्वकर्मसु ॥ इदं महद्त्यागोप्यं पाठोस्वा

थैकसिद्धये ॥२६॥ नावैस्नवायदातव्यंविकल्पोपहतात्मने ॥ भक्तिश्रद्धा
विहीनायविस्नुस्मात्मदर्शिने ॥२७॥ देयंपुत्रायशिष्यायसुहृदेहितका
म्ययामत्प्रसादाद्दतेनेदंग्रहीष्यतिल्पमेधस ॥२८॥ कलौमनुष्यःफलके
ल्पग्रामंतेष्यतिनारदः ॥ लोकानांभाग्यहीनानांयेनदुःखंविनश्यति ॥२९॥
द्विसप्तुवेस्मवेष्टतदार्यावर्तेभविष्यति। नास्तिविस्नोःपरंसत्यंनास्तिविस्नोः
परंतपः ॥३०॥ नास्तिविस्नोःपरंस्थानंनास्तिविस्नोःपरंपदं। नास्तिविस्नोः
परंज्ञानंनास्तिविस्नोःपरंजपः ॥३१॥ नास्तिविस्नोःपरंध्यानंनास्तिवि
स्नोमंत्रमवेस्नवं। किंतस्यबहुभिर्मंत्रैःशास्त्रैःकिंबहुविस्तरैः ॥३२॥ वा

जपेयस्सहस्रैवोभक्तियेस्यजनार्दने ॥ सर्वतीर्थमयोविष्णुःसर्वशास्त्रमयः
प्रभुः ॥ ३४ ॥ सर्वक्रतुमयोविष्णुःसत्यंसत्यंवदाम्यहं ॥ स्नात्वाब्रह्मसारसर्वस्व
मत्यमेतन्मयोदितं ॥ ३५ ॥ श्रीपार्वत्युवाच ॥ धन्यास्म्यनुगृहीतास्मिकृ
तार्थास्मिजगत्प्रभो ॥ यन्मयेदंश्रुतंपूर्वंतद्रहस्यंसुदुर्लभं ॥ ३६ ॥ श्रु
तोव्रतमहत्कष्टंसमस्तसुखदेहरे ॥ विद्यमानेपिसर्वेशोमूढाःक्लिश्यं
तिसंसृतौ ॥ ३७ ॥ यमुद्दिश्यसदानाथोमहेशोपिदिगंबरः ॥ जटिलोभस्म
लिप्तांगस्तपस्वीवीक्ष्यतेजनैः ॥ ३८ ॥ ततोधिकोस्तिकोदेवोलक्ष्मीकांता
न्मधुद्विषः ॥ यत्तत्त्वंचिंत्यतेनित्यंत्वयायोगेश्वरेणहि ॥ ३९ ॥ ततःपरंकिं

मधिकं पदं श्रीपुरुषोत्तमात् ॥ तम विज्ञाय के मूढा भजंते ज्ञानमानिनः ॥ ३८ ॥
मुखितास्मितं यानाथ चिरं यदयमीश्वर ॥ प्रकाशितो नमे यस्याः त्वदाद्या
दिव्यशक्तयः ॥ ३९ ॥ त्वमेव सर्वेश्वरो विभुः सर्वदेवोत्तमोत्तमः ॥ भवदादि
गुरुमूर्त्यैः मामान्यैरुदवीतृप्ति ॥ ४० ॥ महीयसां हि महात्म्यं भजमानानामे
जंति ये द्विषतोपितथा पापानुपेक्षंते कृपयामया ॥ ४१ ॥ मयापि बाल्यस्व
पितुः प्रजा हृष्ट्वानुमुक्तिता ॥ दुःखादशांकाः संपोषं प्रियान ध्यासिताः
पुरा ॥ ४२ ॥ तथा संक्लिष्टिता भ्य प्रजा भ्यो भवदादयः ॥ ॥ पिलसंति मशंका
ह्याः समुत्कं नितरां बांधवाः ॥ ४३ ॥ तया विनाशके देवतत्वे केशवस्य कपरि

ग्रहः ॥ सर्वे प्र(?)तिजीवंतो यातनाभिव संस्थिताः ॥४४॥ तामृतेनैव ध्वर-
मार्थकाममोक्षो हि दुरतः ॥ क्षुधितानां दुर्गतानां कुतो योगसमाधयः
॥४५॥ स च संसारसारैकः सर्वलोकैकनाथ एकः ॥ यशगायकमलायस्य त्य
क्त्वान्नमपि शंकरः ॥४६॥ कथं लोके तेन शोभते नरूपेण जीवसंपदा ॥ सर्वा
२१ ति शायिवीर्येणासंपूर्णस्य महात्मनः ॥४७॥ कस्तेन तुल्यतामेति देवदे २१
वेन विष्णुना ॥ यस्यांशेनावतारेण विना सृष्टौ विलीयते ॥४८॥ जगदेत
त्तथाप्यकृत्दैर्ध्यायेतद्धि मोहिताः ॥ नास्ति जन्मजरामृत्युर्नोप्राप्यान्स्वा(
र्थमेव च ॥४९॥ कामाद्यासक्तचित्ता वा किं तु सर्वेश्वरप्रभौ त्वन्मयता

त्रमेतद्द्वादशश्लोकिमपिठितुंनचेत् ॥५४॥ विष्णोःसहस्रनामैतत्प्रत्यहं
वृषभध्वजः नाम्नैकेनतुयेन स्यात्तत्फलंमहत्
ह्निमेप्रभो ॥५५॥ श्रीमहादेवउवाच ॥ राम रामे
२१ तिरामेतिर  मेरामेमनो  रमेसहस्र २१
नामतत्तु ल्यंश्रीराम नामवरा
नने ॥२५परा इतिश्रीपद्म पुराणेउत्त
रखंडेउमामहेश्वरसंवादेविष्णुर्नाममसहस्रसमाप्तंतनुमम ॥
ज्प्याप्रतितथालिखितंश्रीगुसांइवालवनज्श्रीवासुदेवपठनार्थं ॥